श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## UG-11.17- तृतीय सोपान



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।
देवीं(म्) सरस्वतीं(वँ) व्यासं(न्), ततो जयमुदीरयेत्॥
नामसङ्कीर्तनं(यँ) यस्य, सर्वपापप्रणाशनम्।
प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥

श्रीमद्भागवतमहापुराणम्
एकादशः स्कन्धः
॥ अथ सप्तदशोऽध्यायः ॥

### उद्धव उवाच

यस्त्वयाभिहितः(फ्) पूर्वं(न्), धर्मस्त्वद्भक्तिलक्षणः ।
वर्णाश्रमाचारवतां(म्), सर्वेषां(न्) द्विपदामपि ॥ 1॥

यस्+ त्वया+भिहितः, धर्मस्+ त्वद्+ भक्ति+लक्षणः

यथानुष्ठीयमानेन, त्वयि भक्तिर्नृणां(म्) भवेत् ।
स्वधर्मेणारविन्दाक्ष, तत् समाख्यातुमर्हसि ॥ 2॥

स्वधर्मेणा+ रविन्दाक्ष, समाख्या+ तुमर्+ हसि

पुरा किल महाबाहो, धर्मं(म्) परमकं(म्) प्रभो ।
यत्तेन हं(म्)सरूपेण, ब्रह्मणेऽभ्यात्थ माधव ॥ 3॥

स इदानीं(म्) सुमहता , कालेनामित्रकर्शन ।
न प्रायो भविता मर्त्य- लोके प्रागनुशासितः ॥ 4॥

कालेना+ मित्रकर्शन

वक्ता कर्ताविता नान्यो, धर्मस्याच्युत ते भुवि ।
सभायामपि वैरिञ्च्यां(यँ), यत्र मूर्तिधराः(ख्) कलाः ॥ 5॥

धर्मस्+ याच्युत, वैरिञ्+ च्यां(यँ)

कर्त्राविञा प्रवक्त्रा च, भवता मधुसूदन ।
त्यक्ते महीतले देव, विनष्टं(ङ्) कः(फ्) प्रवक्ष्यति ॥ 6॥

तत्त्वं(न्) नः(स्) सर्वधर्मज्ञ, धर्मस्त्वद्भक्तिलक्षणः ।
यथा यस्य विधीयेत, तथा वर्णय मे प्रभो ॥ 7॥

धर्मस्+त्वद्+भक्ति+लक्षणः

श्रीशुक उवाच

इत्थं(म्) स्वभृत्यमुख्येन, पृष्टः(स्) स भगवान् हरिः ।
प्रीतः क्षेमाय मर्त्यानां(न्), धर्मानाह सनातनान् ॥ 8॥

स्वभृत्य+ मुख्येन

श्रीभगवानुवाच

धर्म्य एष तव प्रश्नो,नैः(श्)श्रेयसकरो नृणाम् ।
वर्णाश्रमाचारवतां(न्), तमुद्धव निबोध मे ॥ 9॥

वर्णाश्रमा+ चारवतां(न्), तमुद्+ धव

आदौ कृतयुगे वर्णो, नृणां(म्) हं(म्)स इति स्मृतः ।
कृत्यकृत्याः(फ्) प्रजा जात्या, तस्मात् कृतयुगं(वँ) विदुः ॥ 10॥

वेदः(फ्) प्रणव एवाग्रे, धर्मोऽहं(वँ) वृषरूपधृक् ।

उपासते तपोनिष्ठा, हं(म्)सं(म्) मां(म्) मुक्तकिल्बिषाः ॥ 11॥

मुक्त+ किल्+ बिषाः

त्रेतामुखे महाभाग, प्राणान्मे हृदयात्त्रयी ।

विद्या प्रादुरभूत्तस्या, अहमासं(न्) त्रिवृन्मखः ॥ 12॥

हृदयात्+ त्रयी, प्रादुरभूत्+ तस्या, त्रिवृन्+ मखः

विप्रक्षत्रियविट्शूद्रा, मुखबाहूरुपादजाः ।

वैराजात् पुरुषाज्जाता, य आत्माचारलक्षणाः ॥ 13॥

विप्रक्षत्रिय+ विट्शूद्रा, पुरुषाज्+जाता

गृहाश्रमो जघनतो, ब्रह्मचर्यं(म्) हृदो मम ।

वक्षः(स्)स्थानाद् वने वासो, न्यासः(श्) शीर्षणि सं(म्)स्थितः ॥ 14॥

वक्षः(स्)+ स्थानाद्

वर्णानामाश्रमाणां(ञ्) च, जन्मभूम्यनुसारिणीः ।

आसन् प्रकृतयो नृणां(न्), नीचैर्नीचोत्तमोत्तमाः ॥ 15॥

वर्णाना+माश्रमाणां(ञ्), जन्मभूम्य+नुसारिणीः,नीचैर्+नीचोत्+तमोत्+तमाः

शमो दमस्तपः(श्) शौचं(म्), सन्तोषः क्षान्तिरार्जवम् ।

मद्भक्तिश्च दया सत्यं(म्), ब्रह्मप्रकृतयस्त्विमाः ॥ 16॥

मद्+ भक्तिश्+ च, ब्रह्म+ प्रकृतयस् + त्विमाः

तेजो बलं(न्) धृतिः(श्) शौर्यं(न्), तितिक्षौदार्यमुद्यमः ।

स्थैर्यं(म्) ब्रह्मण्यतैश्वर्यं(ङ्), क्षत्रप्रकृतयस्त्विमाः ॥ 17॥

तितिक्षौ+ दार्य+ मुद्यमः, ब्रह्मण्+ यतैश्+ वर्यं(ङ्), क्षत्र+ प्रकृतयस्+ त्विमाः

आस्तिक्यं(न्) दाननिष्ठा च, अदम्भो ब्रह्मसेवनम् ।

अतुष्टिरर्थोपचयैर्- वैश्यप्रकृतयस्त्विमाः ॥ 18॥

अतुष्टि+ रर्थो+ पचयैर्, वैश्य+ प्रकृतयस् + त्विमाः

शुश्रूषणं(न्) द्विजगवां(न्), देवानां(ञ्) चाप्यमायया ।
तत्र लब्धेन सन्तोषः(श्), शूद्रप्रकृतयस्त्विमाः ॥ 19॥

शूद्र+ प्रकृतयस् + त्विमाः

अशौचमनृतं(म्) स्तेयं(न्), नास्तिक्यं(म्) शुष्कविग्रहः ।
कामः(ख्) क्रोधश्च तर्षश्च, स्वभावोऽन्तेवसायिनाम् ॥ 20॥

स्वभावोऽन्ते + वसायिनाम्

अहिं(म्)सा सत्यमस्तेय- मकामक्रोधलोभता ।
भूतप्रियहितेहा च, धर्मोऽयं(म्) सार्ववर्णिकः ॥ 21॥

मकामक्रोध+ लोभता,

भूतप्रिय+ हितेहा

द्वितीयं(म्) प्राप्यानुपूर्व्याज्- जन्मोपनयनं(न्) द्विजः ।
वसन् गुरुकुले दान्तो, ब्रह्माधीयीत चाहुतः ॥ 22॥

प्राप्या +नुपूर्+व्याज् , जन्मो+ पनयनं(न्)

मेखलाजिनदण्डाक्ष- ब्रह्मसूत्रकमण्डलून् ।
जटिलोऽधौतदद्वासोऽ- रक्तपीठः(ख्) कुशान् दधत् ॥ 23॥

मेखला+ जिनदण्डाक्ष, ब्रह्मसूत्र+ कमण्डलून्

जटिलोऽ+ धौतदद्+वासोऽ

स्नानभोजनहोमेषु,जपोच्चारे च वाग्यतः ।
नच्छिन्द्यान्नखरोमाणि, कक्षोपस्थगतान्यपि ॥ 24॥

स्नान+ भोजन+ होमेषु ,जपोच्+ चारे,

नच्छिन्+ द्यान्+ नखरो+ माणि ,कक्षोपस्+थगतान्+यपि

रेतो नावकिरेज्जातु, ब्रह्मव्रतधरः(स्) स्वयम् ।
अवकीर्णेऽवगाह्याप्सु, यतासुस्त्रिपदीं(ञ्) जपेत् ॥ 25॥

नाव+ किरेज्+ जातु ,

अवकीर्णेऽ+ वगाह्+ याप्सु , यता+सुस्त्रि+ पदीं(ञ्)

अग्न्यर्काचार्यगोविप्र- गुरुवृद्धसुराञ्छुचिः ।
समाहित उपासीत, सन्ध्ये च यतवाग् जपन् ॥ 26॥

अग्+ न्यर् + काचार्य + गोविप्र, गुरु+वृद्ध+सुराञ् +छुचिः

आचार्यं(म्) मां(वँ) विजानीयान्- नावमन्येत कर्हिचित् ।
न मर्त्यबुद्ध्यासूयेत, सर्वदेवमयो गुरुः ॥ 27॥

नाव+मन्येत, मर्त्य+ बुद्ध्या+ सूयेत

सायं(म्) प्रातरुपानीय, भैक्ष्यं(न्) तस्मै निवेदयेत् ।
यच्चान्यदप्यनुज्ञात- मुपयुं(ञ्)जीत सं(यँ)यतः ॥ 28॥

यच्चान्+यदप्य+ नुज्ञात

शुश्रूषमाण आचार्यं(म्), सदोपासीत नीचवत् ।
यानशय्यासनस्थानैर्- नातिदूरे कृतां(ञ्)जलिः ॥ 29॥

यानशय्या+ सनस्+थानैर्, कृतां(ञ्)+जलिः

एवं(वँ)वृत्तो गुरुकुले, वसेद् भोगविवर्जितः ।
विद्या समाप्यते यावद्, बिभ्रद् व्रतमखण्डितम् ॥ 30॥

व्रत+ मखण्डितम्

यद्यसौ छन्दसां(लँ) लोक- मारोक्ष्यन् ब्रह्मविष्टपम् ।
गुरवे विन्यसेद् देहं(म्), स्वाध्यायार्थं(म्) बृहद्व्रतः ॥ 31 ॥

ब्रह्म+ विष्टपम्, स्वाध्या+ यार्थं(म्), बृहद्+ व्रतः

अग्नौ गुरावात्मनि च, सर्वभूतेषु मां(म्) परम् ।
अपृथग्धीरुपासीत, ब्रह्मवर्चस्व्यकल्मषः ॥ 32॥

गुरा+ वात्मनि, अपृथग्धी+ रुपासीत ,ब्रह्मवर्चस्+ व्यकल्मषः

स्त्रीणां(न्) निरीक्षणस्पर्श- सं(लँ)लापक्ष्वेलनादिकम् ।
प्राणिनो मिथुनीभूता- नगृहस्थोऽग्रतस्त्यजेत् ॥ 33॥

निरीक्षणस्+ पर्श , सं(लँ)ला+ पक्ष्वे+ लनादिकम्,

नगृहस्थोऽ+ ग्रतस्+ त्यजेत्

शौचमाचमनं(म्) स्नानं(म्), सन्ध्योपासनमार्जवम् ।
तीर्थसेवा जपोऽस्पृश्या- भक्ष्यासं(म्)भाष्यवर्जनम् ॥ 34॥

शौचमा+ चमनं(म्), सन्ध्योपा+ सन+ मार्जवम् ,भक्ष्या+ सं(म्)भाष्य+ वर्जनम्

सर्वाश्रमप्रयुक्तोऽयं(न्), नियमः(ख्) कुलनन्दन ।
मद्भावः(स्) सर्वभूतेषु, मनोवाक्कायसं(यँ)यमः ॥ 35॥

सर्वाश्रम+ प्रयुक्तोऽयं(न्), मनोवाक्+ काय+ सं(यँ)यमः

एवं(म्) बृहद् व्रतधरो, ब्राह्मणोऽग्निरिव ज्वलन् ।
मद्भक्तस्तीव्रतपसा, दग्धकर्माशयोऽमलः ॥ 36॥

ब्राह्मणोऽग् + निरिव, मद्+ भक्तस्+ तीव्र+ तपसा, दग्ध+ कर्मा+ शयोऽमलः

अथानन्तरमावेक्ष्यन्, यथा जिज्ञासितागमः ।
गुरवे दक्षिणां(न्) दत्त्वा, स्नायाद् गुर्वनुमोदितः ॥ 37॥

अथा+ नन्त+ रमावेक्ष्यन्

गृहं(वँ) वनं(वँ) वोपविशेत्, प्रव्रजेद् वा द्विजोत्तमः ।
आश्रमादाश्रमं(ङ्) गच्छेन्, नान्यथा मत्परश्चरेत् ॥ 38॥

आश्रमा+ दाश्रमं(ङ्), मत्परश्+ चरेत्

गृहार्थी सदृशीं(म्) भार्या- मुद्वहेदजुगुप्सिताम् ।
यवीयसीं(न्) तु वयसा, तां(म्) सवर्णामनुक्रमात् ॥ 39॥

मुद्वहे+ दजुगुप्+सिताम्, सवर्णा+ मनुक्रमात्

ईज्याध्ययनदानानि, सर्वेषां(ञ्) च द्विजन्मनाम् ।
प्रतिग्रहोऽध्यापनं(ञ्) च, ब्राह्मणस्यैव याजनम् ॥ 40॥

इज्याध्यय+ नदानानि, द्विजन् + मनाम्,

प्रतिग्रहोऽ + ध्यापनं(ञ्), ब्राह्मणस् + यैव

प्रतिग्रहं(म्) मन्यमानस्- तपस्तेजोयशोनुदम् ।
अन्याभ्यामेव जीवेत, शिलैर्वा दोषदृक् तयोः ॥ 41॥

तपस् + तेजो+ यशोनुदम्

ब्राह्मणस्य हि देहोऽयं(ङ्), क्षुद्रकामाय नेष्यते ।
कृच्छ्राय तपसे चेह, प्रेत्यानन्तसुखाय च ॥ 42॥

प्रेत्या+नन्त+सुखाय

शिलोञ्छवृत्त्या परितुष्टचित्तो,
धर्मं(म्) महान्तं(वँ) विरजं(ञ्) जुषाणः ।
मय्यर्पितात्मा गृह एव तिष्ठन्,
नातिप्रसक्तः(स्) समुपैति शान्तिम् ॥ 43॥

शिलोञ् + छवृत्त्या

समुद्धरन्ति ये विप्रं(म्), सीदन्तं(म्) मत्परायणम् ।
तानुद्धरिष्ये नचिरा- दापद्भ्यो नौरिवार्णवात् ॥ 44॥

समुद्+ धरन्ति, तानुद् + धरिष्ये, नौरिवार्+ णवात्

सर्वाः(स्) समुद्धरेद् राजा, पितेव व्यसनात् प्रजाः ।
आत्मानमात्मना धीरो, यथा गजपतिर्गजान् ॥ 45॥

समुद्+ धरेद् , आत्मा+ नमात्मना

एवं(वँ)विधो नरपतिर्- विमानेनार्कवर्चसा ।
विधूयेहाशुभं(ङ्) कृत्स्न- मिन्द्रेण सह मोदते ॥ 46॥

विमाने+ नार्क+ वर्चसा,विधूये+ हाशुभं(ङ्)

सीदन् विप्रो वणिग्वृत्त्या, पण्यैरेवापदं(न्) तरेत् ।
खड्गेन वाऽऽपदाक्रान्तो, न श्ववृत्त्या कथं(ञ्)चन ॥ 47॥

वणिग् + वृत्त्या, पण्यै+ रेवा+ पदं(न्)

वैश्यवृत्त्या तु राजन्यो, जीवेन्मृगययाऽऽपदि ।
चरेद् वा विप्ररूपेण, न श्ववृत्त्या कथं(ञ्)चन ॥ 48॥

जीवेन् + मृग+ ययाऽऽपदि

शूद्रवृत्तिं(म्) भजेद् वैश्यः(श्), शूद्रः(ख्) कारुकटक्रियाम् ।
कृच्छ्रान्मुक्तो न गर्ह्येण, वृत्तिं(ल्ँ) लिप्सेत कर्मणा ॥ 49॥

कृच्छ्रान् + मुक्तो

वेदाध्यायस्वधास्वाहा- बल्यन्नाद्यैर्यथोदयम् ।
देवर्षिपितृभूतानि, मद्रूपाण्यन्वहं(यँ) यजेत् ॥ 50॥

वेदाध्यायस्+ वधास्वाहा, बल्यन्ना+ द्यैर्+ यथोदयम्

यदृच्छयोपपन्नेन, शुक्लेनोपार्जितेन वा ।
धनेनापीडयन् भृत्यान्, न्यायेनैवाहरेत् क्रतून् ॥ 51॥

यदृच्+छयो+ पपन्नेन, शुक्ले+ नोपार् + जितेन, न्याये+ नैवाहरेत्

कुटुम्बेषु न सज्जेत, न प्रमाद्येत् कुटुम्ब्यपि ।
विपश्चिन्नश्वरं(म्) पश्ये- ददृष्टमपि दृष्टवत् ॥ 52॥

कुटुम्+ब्यपि, विपश्+चिन्+नश्वरं(म्)

पुत्रदाराप्तबन्धूनां(म्), सं(ङ्)गमः(फ्) पान्थसं(ङ्)गमः ।
अनुदेहं(वँ) वियन्त्येते, स्वप्नो निद्रानुगो यथा ॥ 53॥

पुत्रदा+ राप्त+ बन्धूनां(म्)

इत्थं(म्) परिमृशन्मुक्तो, गृहेष्वतिथिवद् वसन् ।
न गृहैरनुबध्येत, निर्ममो निरहं(ङ्)कृतः ॥ 54॥

परिमृशन्+ मुक्तो, गृहेष्+ वतिथि+ वद् , गृहै+ रनुबध्येत

कर्मभिर्गृहमेधीयै- रिष्ट्वा मामेव भक्तिमान् ।
तिष्ठेद् वनं(वँ) वोपविशेत्, प्रजावान् वा परिव्रजेत् ॥ 55॥

कर्मभिर् + गृहमेधीयै

यस्त्वासक्तमतिर्गेहे, पुत्रवित्तैषणातुरः ।
स्त्रैणः(ख्) कृपणधीर्मूढो, ममाहमिति बध्यते ॥ 56॥

यस्त्वा+ सक्त+ मतिर्+ गेहे, पुत्रवित्तै+ षणातुरः

अहो मे पितरौ वृद्धौ, भार्या बालात्मजाऽऽत्मजाः ।
अनाथा मामृते दीनाः(ख्), कथं(ञ्) जीवन्ति दुःखिताः ॥ 57 ॥

बालात्+मजाऽऽत्+मजाः

एवं(ङ्) गृहाशयाक्षिप्त- हृदयो मूढधीरयम् ।
अतृप्तस्ताननुध्यायन्, मृतोऽन्धं(वँ) विशते तमः ॥ 58॥

अतृप्तस्ता +ननुध्यायन्

इति श्रीमद्भागवते महापुराणे पारमहं(म्)स्यां(म्)
सं(म्)हितायामेकादशस्कन्धे सप्तदशोऽध्यायः ॥ 17॥

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्) पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः ॥

